DRONA

# CSM – 44 / 15

# Indian Language & Literature
# Sanskrit

## Paper – I

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*The questions must answered in Sanskrit using Devanagari Script.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and **THREE** of the remaining questions, selecting at least **ONE** from each Section.*

### Section – A

1. काश्चन त्रीन् विभागान् उत्तरयत — 20×3 = 60

(क) अधोनिर्दिष्टाः संज्ञाः ससूत्रं सोदाहरणं निरूपणीयाः

(i) प्रातिपदिकम्

(ii) उपधा

(iii) सवर्णम्

(iv) इत्



Click here to get more information about Odisha Civil Services Examination

DRONA

(ख) अधोनिर्दिष्टेषु शब्देषु यथास्थानं ससूत्रं सन्धिं सन्धिविच्छेदं वा कुरुत :

(i) शिवेहि

(ii) पतञ्जलि:

(iii) उपैति

(iv) सन्नच्युत:

(v) पुनर् + रमते

(vi) अहन् + अहन्

(vii) सर्प: + सरति

(viii) उत्थानम्

(ix) षट्त्सन्त:

(x) नौ + य

(ग) अधोनिर्दिष्टानां पदानां विभक्तय: ससूत्रं प्रदर्शनीया:

(i) रामेण वाणेन हतो वाली ।

(ii) अक्षान् दीव्यति ।

(iii) लोकाद् अधिको हरि: ।

(iv) गच्छतां धावन् शीघ्र: ।

(v) कृष्णेन सदृशो वीरो नास्ति ।

(घ) अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत :

(i) विष्णु: समुद्रम् अधिशेते ।



Click here to get more information about Odisha Civil Services Examination

DRONA

(ii) तिमयः जलं वितन्वन्ति ।

(iii) मया दिनानि अतिवाहितानि ।

(iv) अहम् अश्रु विसृष्टवान् ।

(v) नदी जलानि वहति ।

2. चम्पूकाव्यस्य लक्षणमुल्लिख्य नलचम्पूकाव्ये लक्षणसमन्वयं कुरुत । 60

3. संस्कृतदृश्यकाव्येषु भवभूतेरवदानं निरूपयत । 60

4. इन्दो-इउरोपीय-भाषावर्गस्य परिचयं प्रदत्त । 60

## Section – B

5. यथेच्छं त्रयः प्रश्नाः समाधेयाः : 20×3 = 60

(क) भारतीयसंस्कृतौ चातुर्वर्ण्यस्य परिचयमेकमुपस्थापयत ।

(ख) गृहस्थपालनीयानां संस्काराणां परिचयं प्रदत्त ।

(ग) संस्कृते आयुर्वेदविषयकानां ग्रन्थानां विवरणं दत्त ।

(घ) गूढपुरुषोत्पत्तेः तात्पर्यं विश्लेषयत ।

6. बौद्धदर्शनस्य परिचयमेकं प्रदत्त । 60

7. 'आधुनिकभारतवर्षस्य शिक्षाव्यवस्था' इति शीर्षकमवलम्ब्य कश्चित् प्रबन्धः लेखनीयः (प्रायः त्रिशतशब्दैः) । 60

8. गद्यांशममुमाश्रित्य अधः प्रदत्ताः प्रश्नाः समाधेयाः : 60

गृहस्यैकस्य दिक्चतुष्टयमग्निना परिवेष्टितमभूत् । गृहस्थाः सर्वएव



Click here to get more information about Odisha Civil Services Examination

प्राणभयेन पलायितवन्तः । ईदृशे काले शोकातुरा कापि रमणी विलपन्ती तज्ज्वलद्गृहम् प्रवेष्टुमुद्यता बभूव । तस्याः प्राणाधिका दुहिता तस्मिन् गृहे वर्त्तते इति न पलायनकाले स्मृतमभूत् । ये जलयन्त्रमुपादाय समाजग्मुः तेषामेकः साहसिकः पुरुषो जननीं सान्तयित्वा स्वयं तस्या दुहितरम् अग्निपूर्णगृहाद् बहिरानेतुं प्राद्रवत् । इतश्च जलयन्त्रादग्नेरुपरिष्टात् अविरलधारया जलानि विकीर्यमाणान्यासन् । साहसिकः पुरुषो गृहाभ्यन्तरं प्रविश्य समपश्यत् दिक्चतुष्टयं घनधूमसमाच्छन्नम् । स तत्र कमपि जनं नापश्यत् । किन्तु बालिकामग्निमध्ये विमुच्य स्वयमेव वा कथं शोकातुरां जननीं मुखं दर्शयिष्यते । अतः सोऽन्धकारे बालिकां हस्तेनान्वेष्टुमारभत । बहिर्जना दृष्टार्तिविलम्बास्तस्य मृत्युं निश्चितवन्तः । इतस्तु गृहमध्ये वह्निः प्राज्वलत् । तदालोकेन वीरपुरुषः सुषुप्तां बालिकां चक्षुषा समुपलभ्य क्रोडे सन्निवेश्य सोर्द्धश्वासं गृहाद् बहिर्बभूव । समन्ततश्चानन्दकोलाहलः समुदचरत् ।

(क) रमणी कथं कुत्र प्रवेष्टुमुद्यता ?

(ख) कः कामानेतुं कुत्र प्रविष्टः ?

(ग) कथं पुरुषः कमपि नापश्यत् ?

(घ) गृहमध्ये पुरषः किमकरोत् ?

(ङ) पुरुषः केन उपायेन बालिकामुद्धारयामास ?

(च) कथमानन्दकोलाहलः सञ्जातः ?



Click here to get more information about Odisha Civil Services Examination